# आलम्बनपरीक्षाटीका

विनीतदेवकृता

नमः सर्वबुद्धबोधिसत्त्वेभ्यः

कृपाविष्टाशयं नत्वा सर्वज्ञं शिरसा [मया] ।
आलम्बनपरीक्षाया विवृतिः सुविरच्यते ॥

ये चक्षुरादिविज्ञानानामित्यनेन प्रथमपदेन प्रकरणस्यास्याभिधेयं विपर्ययकारणलक्षणञ्च प्रदर्शयन्ति । प्रयोजनसम्बन्धौ च सामर्थ्यादनुमीयते । सामर्थ्यञ्च प्रकृते प्रदर्शयितव्यम् । प्रकरणस्यास्य सम्बन्धाभिधेयप्रयोजनान्यवश्यं वक्तव्यानि । तथा नो चेत् असम्बन्धमनभिधेयमप्रयोजनञ्च प्रकरणं प्रतिपत्तेः पूर्वमेवोपेक्ष्य अनभ्युपगतं स्यात् । अतोऽत्र—

ये चक्षुरादि विज्ञानानां ,बाह्यार्थं आलम्बनमितीच्छन्ति । ते परमाणून् सङ्घातं व कल्पयन्ति । इत्यनेन हेयस्वभावाभिधेयनिर्देशः ।

तत्कारणत्वादिति

तदाभज्ञानजनकत्वात्

इत्यनेन च विपर्ययकारणलक्षणनिर्देशः । प्रयोजनसम्बन्धौ च सामर्थ्यान्निर्दिष्टौ । तत्र सामर्थ्यन्त्विदमित्यवगन्तव्यम् । बाह्यालम्बनप्रतिषेधाय अन्तरालम्बनप्रसाधनाय च प्रकरणमिदमारभ्यते । अतो बाह्याध्यात्मिकार्थप्रतिषेधप्रसाधनार्यै प्रकरणारम्भसामर्थ्यात् प्रतिषेधप्रसाधने प्रयोजनम् । प्रकरणन्तुपायत्वेन निर्दिष्टं भवति ।

एवं प्रतिपत्तेः पूर्वमेवोपेक्षितारो नाप्रयोजने प्रवर्तेरन् । नाप्यनुपाये । अत्र ज्ञानेन बाह्यालम्बनप्रतिषेधे अन्तरर्थप्रसाधने च वक्तव्ये तदुभयोः प्रतिषेधः प्रसाधनञ्च प्रयोजनम् । तच्च प्रयोजनं प्रकरणेनानेन क्रियते । तत्प्रकरणन्तु प्रयोजनस्यास्योपायः । तस्मात् प्रकरणप्रयोजनाभ्यामुपायोपेयलक्षणाभ्यां सम्बन्धो भवति । एवञ्च बह्यान्तरार्थप्रतिषेधप्रसाधनार्थं प्रकरणारम्भ इति स्थितिः ।

एवं स्थिते कदाचित्प्रतिषेधप्रसाधने, किमाभ्याम् । ते तु कुत्रापि नस्त इति संवर्ण्यते चेदत्रोच्यते हेयोपादेयप्रतिषेधप्रसाधने ये स्तः ते । तयोरुभयोर्हानोपादाने क्रियेते । एवं बाह्यार्थहानाय प्रतिषेधः क्रियते । कथञ्च प्रतिषेधः । बाह्यार्थो हेय एवेति ज्ञात्वा हीयत इति प्रतिषिध्यते । तथा प्रसाधनमन्तरर्थं उपादेय एवेति ज्ञात्त्वा उपादीयत इति प्रसाध्यते । अतो बाह्याध्यात्मिकौ हेयोपादेयौ । हेयस्योपादानात् प्रतिषेधः [उपादेयस्य हानात्] प्रसाधनञ्च क्रियते इत्यतः प्रयोजनं पुनरुक्तं भवति ।

एवं तर्हि यथा प्रथमवाक्येन हेयस्वभावोऽभिधेयो निर्दिश्यते। तथा उपादेय-स्वभावोऽपि निर्देष्टव्य इति चेदत्रोच्यते–बाह्यार्थवादिनो बाह्यार्थं परिकल्पयन्तोऽत्यन्त-बाधिताः। तस्मात्तेनैव निर्दिश्य [यत्] खण्डयते तत् प्रतिषिद्धयते। पश्चादवसरे—

यदन्तर्ज्ञेयरूपं यत् बहिरिवावभासते। सोऽर्थं इत्यनेन अन्तरर्थं उपादीयते अयं समुदायार्थः।

अवयवार्थस्तूच्यते। ये चक्षुरादिविज्ञानानामिति न सर्ववादिनो बह्यार्थमालम्बन-मिच्छन्ति। अत य इत्युक्तम्। यानीन्द्रियाणि चक्षुरादीनि सन्ति तानि चक्षुरादीनि। आदि-विवनेन श्रोत्रादीनि मनः[1] पर्यन्तानि गृह्यन्ते। एवं मनोऽपि बाह्यालम्बनकमिष्यत एव। अतस्तदालम्बनमप्यत्र एकधा प्रतिषिध्यते। किं तत् प्रतिषेधस्थापनेन कार्यम्। येन शास्त्र-कारेण अन्त [र्थो] व्यवस्थाप्येत। न तेन [बाह्य] विषयो सुमतिषिद्धो भवति।

अत्र आचार्यधर्मपालेन स्वटीकायां मनोविज्ञानस्यालम्बनस्थापनाय यत् बहूक्तम्। तत् स एव जानाति। तदाशयस्य गभीरत्वान्न वयं विद्मः[2]।

चक्षुरादीनां विज्ञानं चक्षुरादिविज्ञानम्। चक्षुराद्याकाराणां बहुत्वादेव विज्ञानाकारा बहुतया निर्दिश्यन्ते। अतो विज्ञाने बहुवचननिर्देशः। तद्यथा ताम्रपत्राणां लौहित्यविकारः। बाह्यार्थ आलम्बनमित्यत्र बाह्यार्थो बाह्यो विज्ञानव्यतिरिक्त इत्यर्थः। प्रतीयमानोऽर्थः स ज्ञेय [रूपः] ग्राह्य इत्यर्थः। अर्थशब्दोऽत्र विषयपर्यायितया निर्दिष्टो न वस्तुसन् विहितः एवं सङ्घातोऽपि विषयतया ख्यापितो न द्रव्यसन्। आलम्बनमितीच्छन्तीति। ग्राह्यमभ्युप-गच्छन्तीत्यर्थः।

ते परमाणून् वा इति।

ते वादिनो विज्ञानस्य विषयः परमाणव इति वाभ्युपगच्छन्ति। ते तु अणुषु परमाश्चेति परमाणवः। यदूर्ध्वं परममन्यन्नास्ति। अतोऽत्यन्तसूक्ष्मा इत्यर्थः। यद्यपि परमाणवः संहताः एवोत्पन्ननिरुद्धाः। तथापि अन्य एते संहताः ते चालम्बनमितीच्छन्ति। यथेन्द्रियशक्तीनां प्रतिनियमात् रूपरसादय एकत्र संहता अपि प्रतिनियतेन्द्रियग्राह्याः। तथा विज्ञानस्यापि द्रव्यपरिच्छेदे शक्तिनियमात् अणवः पृथगालम्बनं न तु सामान्यमिति प्रसिद्धिः। संहता यद्यपि तथापि तेऽतिसूक्ष्माः कथमालम्बनं स्युः। अतः तत्कारणत्वादित्याह। ते यद्यपि सूक्ष्माः तथापि यस्मात् द्रव्यतः सन्तीति विज्ञानस्य कारणभावतो भवन्ति। तस्मा-दालम्बनमिच्छन्ति। आलम्बनस्यार्थो हेतुरिति तदाशयः। प्रत्ययेषु आलम्बननिर्देशात्, प्रत्य-यस्य च हेतुत्वात् हेतुता। इयश्चान्यदृष्टौ परमाणव आलम्बनमिति परिकल्पनायां विपर्यय-हेतुलक्षणम्। एवं तेषां विज्ञानकारणभावे सति बाह्यार्थवादिनः [परमाणव] आलम्बनमितीच्छन्ति। तत्कारणत्वादित्यत्र तच्छब्दो विज्ञानेन सम्बध्यते।

द्वितीयपक्षोऽन्याशाय तत्सङ्घातं वा कल्पयन्ति इत्याह। विज्ञानस्यालम्बनं परमाणुसङ्घातं कल्पयन्ति खलु। तेषां कायस्तत्सङ्घातः। तच्छब्देन परमाणवो गृह्यन्ते। तेन परमाणु [सङ्घात] इत्युक्तं भवति। अपि च कस्मात् तत्सङ्घातमालम्बनमिच्छन्ति। तदाभज्ञानजनकत्वादित्याह। यस्माच्चक्षुरादिविज्ञानं सदा सङ्घाताभासं जायते। तस्मात्सङ्घातमालम्बनमिच्छन्ति। अत्र च सङ्घात आलम्बनमेवेति परिकल्पनायां विपर्ययहेतुलक्षणं सङ्घाताभासता। यस्मात् विज्ञानं सङ्घाताभासम्। तस्मात् परः सङ्घात आलम्बनमिति मन्यते। एवं विज्ञानं यादृशाभासमुत्पद्यते। स तस्य विषय इतीच्छन्तीत्युक्तं भवति। विज्ञानेऽस्मिन् तादृश आभासोऽस्तीति तदाभासम्। अत्र च तच्छब्देन सङ्घातेन सम्बध्यते। इदानीं तदाभासश्च विज्ञानञ्चेति विगृह्य तदाभासविज्ञानजनकमिति समासः। एवञ्चात्र पर आलम्बनलक्षणतोपपत्तेः परमाणवः सङ्घातो वा आलम्बनमिति मन्यन्ते: इति पूर्वपक्षः।

तत्र तावत्पूर्वपक्षद्योतनायाह –

(1) यद्यपीन्द्रियविज्ञप्तेः कारणं परमाणवः।

इत्यादि। परमाणवः परमार्थतो न द्रव्यसन्तः। सावयवत्वकल्पनायां संवृतिसन्त एव प्रसज्यन्ते। निरवयवत्वकल्पनायामपि छायावरणाद्यभावप्रसङ्गः। तस्मादेषां कारणता दृश्यते। तथापि परमाणूनां कारणतां स्वीकृत्य आलम्बनता प्रतिषिध्यते। परमाणवो यद्यपि विज्ञप्तेः कारणम्। तथापि यस्मात् ते परमाण्वाकारं विज्ञानं नोपादयन्ति। तस्मान्नालम्बनम् अक्षवत्। अक्षे यद्यपि विज्ञप्तिकारणभावोऽस्ति। [तथापि] तत् तस्य विषय इति परो नेच्छति। यतो विज्ञानमक्षाकारकतया नोत्पद्यते। इन्द्रियविज्ञप्तेरित्यत्र इन्द्रियपदेन मनः-पर्यन्तमिन्द्रियषट्कं गृह्यते। अत्र हेतुरुक्त एव। परमाणव इतीदमर्थप्रतिपादकम्। यद्यपीत्यनेन अभ्युपगमप्रदर्शनम्।

अतदाभतयेत्यत्र यत् तद्वदाभाति तत् तदाभम्। तच्छब्दः परमाणुभिः सम्बध्यते। न तदाभम्, अतदाभम्। तृतीयाविभक्त्या हेतुर्निर्दिश्यते। तेन परमाण्वाकार-कत्वाभावादित्युक्तं भवति। तस्या इति इन्द्रियविज्ञप्तेः।

(1c.d) नाक्षवद्विषयोऽणव इति।

यथेन्द्रियाणि न विषयदृशानि। तथा परमाणवोऽपि तत्समा इत्यर्थः। अक्षशब्देनात्र अधिपतिकरणानि उच्यन्ते। यदि विज्ञानं परमाण्वाकारकं न स्यात्। तत् तेनैव दुष्टं भवेत् खलु। परमाणवो बुद्धिजनका इव कस्मान्न विषयः इति चेदाह –

तस्य विषय इत्यादि।

विषयो हि यस्य स्वभावः तदाकारोत्पन्नोऽवधार्यते [Lit. तस्य] सः।

हि शब्दो यस्मादित्यर्थे। स्वभावोऽवधार्यत इत्यत्र स्वभावग्रहणेन स्वसामान्यलक्षण-मभिप्रेतम्। तदवधारणम् अवगतिः। परिच्छिद्य गृह्यत इत्यर्थः।

तदाकारोत्पत्तेरिति ।

विषयाकारोत्पत्तिं विना नान्यद्विज्ञानेन विषयावधारणं शक्यते । तस्मान्नीला-कारतयोत्पद्यमानविज्ञानेन नीलाद्यर्थोऽवधार्यत इत्यत्र को व्यापारः । विज्ञानमिदं विषय-मवधारयतीति व्यापार उपचर्यते । अवधारणक्रिया न काप्यस्ति । [यथा] पितुराकारानुकारेण जायमानः पुत्रः पितृरूपं गृह्णातीति । विज्ञानं विषयाकारमनुकुर्वदुत्पद्यत इत्यतोऽपि विषयं गृह्णातीति व्यवहारोपचारः । तत्रैवं परमाणूनामपि तदाकारोत्पत्तेः स्वभावोऽवधार्य इत्याश-यश्चेदत आह –

परमाणवस्तत्कारणत्वे सत्यपि न तथा ।

इत्यादि । परमाणूनां तत्कारणत्वे सत्यपि विज्ञानं [तेषां] प्रतिनियताकारान् यदि नानुकरोति । तत् कथं तेषां स्वभावं गृह्णीयात् । अनवधारणे च कथं [ते] विषयाः स्युः । तत्कारणत्वे सत्यपीति विज्ञानकारणत्वे सत्यपीत्यर्थः । अत्र दृष्टान्तः–

अक्षवत् इति ।

यथा अक्षे कारणभावे सत्यपि तदाकारतयोत्पद्यमानं विज्ञानं न तत्स्वभाव-मवधारयतीति [तस्य] विषयता नेष्यते । परमाणवोऽपि तादृशा द्रष्टव्याः । अक्षमपि आलम्बनताप्रसङ्गयोग्यम् । अत आलम्बनं नैव केवलं हेतुलक्षणम् । एवं परमाणूनामा-लम्बनतां प्रतिषिध्योपसंहारायाह –

एवं तावत् इत्यादि ।

आलम्बनलक्षणायोगात्परमाणवो नालम्बनमित्यर्थः ।

अत्र प्रयोगः– परमाणवो नालम्बनम् , स्वाभासविज्ञानाजनकत्वात् । अक्षवत् वैधर्म्ये [दृष्टान्तो] ग्राह्यभागः । स्वाभासविज्ञानाजनकमपि यद्यालम्बनम् । अतिप्रसङ्गो बाधकं प्रमाणम् । अथवा परमाणवो नालम्बनम्, स्वभावानवधारणात् अक्षवत् । वैधर्म्ये [दृष्टान्तो] ग्राह्यभागः । ग्राह्यभाग आलम्बनमेव सिध्यति । स्वभावानवधारणमपि यद्यालम्बनम् । अतिप्रसङ्गो बाधकं प्रमाणम् । इमौ द्वौ प्रयोगौ आचार्यधर्मपालेन भाषितौ[3] मया च कथितौ । न स्वभाषितौ । एवं तावत्परमाणूनामालम्बनता प्रतिषिद्धैव ।। १ ।। सङ्घातस्यापि प्रतिषेधायाह –

सङ्घातस्तदाभासत्वे सत्यपि इति ।

यद्यपि विज्ञप्तिः सङ्घातवत्तयाऽवभासते । तथापि सङ्घातो नालम्बनम् यतः सा विज्ञप्तिः न ततः उत्पद्यते । ततो नोत्पद्यताम् । अथाप्यालम्बनं कस्मान्न भवेत् । अत उत्तरमाह –

(२( यदाभासा इत्यादि ।

तथाहि

योऽर्थः स्वभासामात्मभासां विज्ञप्तिमुत्पादयति स ह्यालम्बनं युज्यते । एवं विज्ञानं यस्यार्थस्य रूपमनुकरोति । स चोत्पादकश्चेदालम्बनप्रत्ययो युज्यते नान्य इत्युक्तं भवति ।

उत्पादक एवालम्बनं स्यादिति कस्मात् ज्ञायते । इति चेदाह—एवं स इति ।

यतः स तु शास्त्रे उत्पत्तिहेतुलक्षणतयोक्तः । शास्त्रे ह्येवं भवति—योऽर्थश्चित्त-चैत्तानामुत्पत्तिहेतुलक्षणश्च, तेषूत्पन्नेषु सोऽर्थोऽनुभवव्यवहार उपचर्यते स च आलम्बनम् इति - एवं योऽर्थश्चित्तचैत्तानामुत्पादकः, चित्तचैत्तेषु चोत्पन्नेषु तस्मिन्नर्थे अयमनुभूयत इति तथाभूतव्यवहार उपचर्यते । सोऽर्थ आलम्बनम् इत्युक्तं भवति । तस्मादुत्पत्तिहेतुलक्षणश्चेति वचनात् आलम्बनप्रत्यय उत्पादकतया सिद्धः । तदाकारता तु एतत्पक्ष [मात्र] प्रसिद्धत्वा-दनुक्ता । तेनोभयलक्षणान्वितो योऽर्थः स आलम्बनमित्युक्तं [4]भवति ।

तत्रैवं मन्यते—सङ्घातोऽप्युत्पादक इति । अत आह—

सङ्घातस्तु न तथा इति ।

सङ्घात उत्पादको न भवति । विज्ञप्त्युत्पादे स कथमालम्बनं स्यात् । कुतो नोत्पादक इति चेदाह—

(2b) द्रव्याभावात् इति ।

यस्मात् सङ्घातो द्रव्यं न भवति । तस्मान्नोत्पादकः अद्रव्याणां फलोत्पत्तावशक्तत्वात् । सङ्घातो नैव द्रव्यम् इत्यधस्तात्साधयिष्यते । यत् द्रव्यं न भवति न तदुत्पादकमित्यत्राह—

(2c) द्विचन्द्रवत् इति ।

एवमद्रव्यत्वात् द्विचन्द्राभासज्ञानकारणभावो न भवति । तथा सङ्घातोऽपि स्वाभासज्ञानकारणवस्तु न भवति । यदि चन्द्रद्वयं न तदुत्पादयति । तर्हि तदहेतुलक्षणकं स्यात् इति चेदत आह—

इन्द्रियवैकल्यात् इत्यादि ।

5

नाहेतुलक्षणकम् । एवमुपहतेन्द्रियेण चन्द्रद्वयं दृश्यते । यदा चक्षुरिन्द्रियं तिमिरोपहतं भवति । तदा चन्द्रद्वयाभासज्ञानमुत्पद्यते । न तत् चन्द्रद्वयसमुत्पन्नम् । यदा तेन नोत्पन्नं तदा चन्द्रद्वयज्ञानेन चन्द्रद्वयं भासमानमपि न तस्य विषयः । तेन अनुत्पादकत्वाद्विषयो न भवतीत्युक्तं भवति । अत्र वैकल्यशब्देन उपहतिरुच्यते ।

एवं दृष्टान्ते प्रसाधयित्वा [दार्ष्टान्तिके] वस्तुनि उपयोजयितुमाह—

एवमद्रव्यसत्त्वात् इत्यादि ।

यथा चन्द्रद्वयमद्रव्यत्वान्न ज्ञानकारणम् । अकारणत्वान्न तद्विषयः । तथा सङ्घातोऽपि अद्रव्यत्वान्न ज्ञानकारणम् अकारणत्वान्न तद्विषयः । तत्र प्रयोगः—

सङ्घातो न ज्ञानकारणम् अद्रव्यत्वात् चन्द्रद्वयवत् इति । वैधर्म्य [दृष्टान्तः] विज्ञानम् । अद्रव्याणामशक्तत्वं बाधकं प्रमाणम् । अथवा सङ्घातो नालम्बनम् अकारणत्वात्, चन्द्रद्वयवत् । वैधर्म्य [दृष्टान्तः] ग्राह्यभागः । ग्राह्यभागः कारणमेव आलम्बनमेव च प्रसिध्यति । अकारणमपि आलम्बनमेवेति चेत चन्द्रद्वयादपि आलम्बनं स्यादिति अतिप्रसङ्गो बाधकं प्रमाणम् । [6]इदं प्रमाणद्वयमपि आचार्यधर्मपालेनोक्तम् ॥ 2a-b ॥

एवं पक्षद्वयं प्रतिषिध्योपसंहारायाह—

(2c.d) एवं बाह्यद्वयमपि न युक्तं बुद्धिगोचरः ॥ २ ॥

इत्यादि । एवमुक्तरीत्या दृष्टिद्वयेऽपि बाह्यार्थो विज्ञानविषयो न युज्यते । बाह्यं विज्ञानव्यतिरिक्तम् । द्वयमिति । परमाणुपक्षः सङ्घातपक्षश्चेति दृष्टी । बुद्धिरिति विज्ञानम् । कस्मान्न युज्यते । अत आह—

एकाङ्गवैकल्यात् इत्यादि ।

एवं परमाणुपक्षे कारणतास्ति न तदाकारता । सङ्घातपक्षे च तदाकारतास्ति न कारणता । एवं सति अङ्गेन तेन वैकल्यात् परमाणवः सङ्घाताख्यश्चार्थो नालम्बनम् । एवमालम्बनताया अङ्गद्वैविध्यम्—स्वाकारार्पणं कारणता च परमाणुसङ्घातयोर्नास्तीति न तयोर्द्वयोर्विषयता इत्युक्तं भवति । अतो विषयो धर्मताद्वयवान् इति भवति । तत्र च तदङ्गद्वयमेव धर्मताद्वयस्य प्रपञ्चः सम्पद्यते ॥ 2 ॥

एवं द्वयं प्रतिषिध्य तृतीयपक्षोपन्यासायाह —

अत्र केचित् इत्यादि ।

बाह्यार्थवादपक्षे चास्मिन् [7] वाग्भटादयः केचित् परमाणुसञ्चिताकारान् इन्द्रियविज्ञानकारणमिच्छन्ति । त एवं वदन्ति—परमाणुषु सञ्चिताकारोऽप्यस्ति । [8] परमाणुषु यत्किञ्चिदस्ति तत् सर्वं द्रव्यसत् । द्रव्यसत्त्वात् सञ्चिताकारो विज्ञानकारणकारणतया भवति । स्थूलत्वात् विज्ञाने स्वभावमर्पयति । तेन परमाणवः प्रकारान्तरेण विषया एवेति । हिशब्दश्चार्थो द्रष्टव्यः । सञ्चिताकारोऽत्र स्थूलाकारः । साधनं कारणम् । परमाणूनामाकारोऽतिसूक्ष्मः प्रसिद्धो ननु । तेन तेषां सञ्चिताकारोऽयं कुत्र सम्भवेत् सम्भवतु वा, एकत्र कथं द्वैविध्यं युज्यते इति चेदाह—

सर्वेऽप्यर्था अनेकाकारका इत्यादि ।

अयमत्र न दोषः । यस्मात् सर्वस्य रूपिणा भावस्य अनेकाकारत्वात् तथाहि रूपं सर्वं चतुर्महाभूतरूपमेव । तानि च नीलसुरभिमधुरकर्कशाद्याकारवत्त्वादनेकाकाराणि । यथा च परमाणषु अनेकाकारतास्ति तथा सञ्चिताकारोऽयमपि तेषु भवेत् । यदि सर्वे अर्था अनेकाकारकाः । कस्मदाकाराः सर्वे न ज्ञायन्ते । अत आह –

तत्र केनचिदाकारेण इत्यादि ।

ते यद्यपि अनेकाकाराः । तथापि केनचिदाकारेण ते प्रत्यक्षमिष्यन्ते । न तु सर्वाकारेण । यतस्तेषां प्रतिनियतशक्ति [ग्राह्य] त्वादिन्द्रियाणि न सर्वमर्थं गृह्णन्ति ।

इदन्तु भदन्तबुद्धदेवसमयानुसारेणोक्तम्[9] । तथा सति दशायतनानि भूतमात्राणि । एवमनेकाकारतां प्रसाध्य प्रकृते योजनायाह –

परमाणुष्वपीत्यादि।

परमानुष्वपि सञ्चिताभासज्ञानोत्पत्तिहेतुभावोऽस्ति । परमाणवः सञ्चिताकारकज्ञानमुत्पादयन्तीत्यर्थः । परमाणुषु सञ्चिताकारास्तितासाधनात् परमाणुषु सञ्चिताकारोऽस्तीति वक्तव्यं ननु । कस्मादेवं परमाणष्वपि सञ्चिताभासज्ञानोत्पत्तिहेतुभाव इष्यते चेदत्रोच्यते । आलम्बनस्य भागद्वयप्रदर्शनात्तथोक्तम् । तत्र ज्ञानोत्पत्तिहेतुभाववचनेन कारणतास्तीति स्वशब्दनिर्दिष्टम् । सञ्चिताभासवचनेन तदाकारार्पणं सञ्चिताकारास्तिता च प्रसाध्यते । यस्मादर्थेन विज्ञाने स्वात्मनि सन्ताकारोऽर्प्यते नासन् । तस्मातसञ्चिताकारोऽस्तीत्युक्तमेव ।

यदि परमाणुषु स्थूलाकारोऽस्ति । कथं तेषु परमाणुसाहित्यं कार्यम्[10] । कथं परमाण्वाकारं सन्निहितवच्चन गृह्णीमः । तस्मादाह –

(3c.d) अण्वाकार इत्यादि ॥ 3 ॥

तस्यैव व्याख्यानायाह –

यथा कठिनतादि इत्यादि ।

यथा काठिन्यशैत्यौष्ण्य दयो विषयाः सन्तोऽपि बृहद्धब्बुद्धिः अल्पे शरावबुद्धि-रूत्पद्यत इत दं न भवति ॥ 4a. b ॥

परस्य वचनावकाशप्रदर्शनायाह —

इन्द्रियशक्तीनां प्रतिनियत्वात् चाक्षुषबुद्धिविषया न भवन्ति । तथा परमाणवोऽपि तथैव न भवन्ति । तमेवाकारं निश्रित्य चैषु परमाणुसाहित्यव्यवहार उपचर्यंते । चशब्द एवकारार्थो द्रष्टव्यः । एवं तृतीयं पक्षमुपन्यस्य दूषणमुद्भावितम् ॥ 3 ॥

(4) भवेद्धटशरावादे स्तथा सति समा मतिः । इत्यादि ।

ये परमाणु सञ्चिताकारोऽस्तीति स्वीकुर्वन्ति । तेषु पर्यनुयोगः कार्यः [यदुत] परमाणुषु यः सञ्चिताकारः स्वीकृतः । [स] लोके तावत् घटशरावनरकादौ हिमादौ च सञ्चयः प्रसिद्धः । तेषामाकारो यः परमाणावस्ति । [स] यदि घटाकार इति चेत् तदा शरावादिसङ्घाते सर्वत्र घटबुद्धिर्भवेत् । अथ शरावाकार इति चेत् तदापि सर्वत्र शरावबुद्धिर्भवेत् । किन्तु क्वचित् घटबुद्धिः क्वचित् शरावबुद्धिरिति यो बुद्धिभेदः । स न भवेत् । इति । बुद्धिविषयस्य स्वरूपमनुकृत्योत्पद्यते । विषयश्च एकस्वभावः सन् कथं बुद्धिभेदक उच्येत ।

तत्रैवं घटे परमानुबहुता शरावेऽल्पता । तथान्यत्रापि बह्वल्पता ज्ञेया । अतो बह्वल्पताकृतोऽयं बुद्धिभेदोऽस्तीति मतञ्चेदत आह—

घटशरावादीनां परमाणुषु इत्यादि ।

अत्राल्प बहुताकृतो बुद्धिविशेषो न युक्तः । तथाहि यद्यपि घटे परमाणुबहुता शरावेल्पता । तथापि परमाणुगतकायाकारे स्वतः सन् विशेषः कोऽपि नास्ति । तस्मात्सदोषस्तत्र तदवस्थः । यत्र परमाणवो बहवः तत्र घट धर्मः । यत्राल्पघर्मता तत्र क्षुद्रघट इति सत्यपि सदृश सङ्घाताकारे बृहद्धवबुद्धिः अल्पे शराब - बुद्धिरूत्पद्यत इत दं न भवति ॥ 4a. b ॥ परस्य वचनावकाशप्रदर्शनायाह —

(4c. d) आकारभेदाद्भेदश्चेत् इति ।

तस्यैव व्याख्यानायाह —

यदि मन्यस इत्यादि ।

यदि मन्यसे—घटस्य ग्रीवा वक्रा दृश्यते । स च घटः । उदरं पृथु भवति तदपि आयतं भवति । एवमादयोऽस्याकारभेदाः । शरावेऽपि पादं निम्नम इत्याद्याकारभेदाः । अत आकारभेदद्वारा घटशरावादिबुद्धयो भिद्यन्त इति ।

आकारविशेषः कर्म इत्यत्र आकारभेदः संस्थानं सन्निवेश अवस्थान मित्यर्थः ।

आकारभेदो नैव विषय इति प्रदर्शनायाह –

अयमुपाधि[र्यद्यपि] घटादावस्ति इत्यादि ।

भवतो घटशरावाद्याकारोपाधिर्यो निर्दिष्टः तेषां विशेषकः अयमस्ति । तं वयमपि यद्यपि नापलपामः । तथापि ये द्रव्यसन्तः परमाणवः । तेषु स आकारभेदो नास्ति ॥ 4 ॥

तत्कस्मादिति चेदाह—

(5) [तत] परिमाणाभिन्नत्वात् इति ।

एवं परमाणूनां पारिमाण्डल्यं यत् तत्र भेदो नास्ति । घटपरमाणवो द्रव्यान्तराण्येव शरावस्थापि द्रव्यान्तराणि ननु । तत्कथ परिमाणभेदो नास्ति इति चेदाह—

परमाणुषु इति ।

यस्मात् घटशरावादीनां परमाणुषु द्रव्यन्तरेष्वपि पारिमाण्डल्ये भेदो नास्ति । तस्मात्परमाणुषु आकारभेदो नास्ति । यथा भवतां दर्शने परमाणुषु

यावत्किञ्चिदस्ति तत्सर्वं द्रव्यसत्। तथा [नः] परमाणुषु यत्किञ्चित्परिमाणमस्ति। तत्सर्वं पारिमाण्डल्यरूपमेकमेव। तस्मात्कथं तेषां भेदाद्भिद्यते।

यद्यपि सञ्चिताकार अभेद इष्यते। तथापि द्रव्यसत्वात तेन च निरवयवतयैव भवितव्यम्। एवमसति तु तस्य सावयवत्वे द्रव्यसन्नेव न भवेत्। अनवयत्वात् स्वस्मिन् सन्निवेशभेददर्शनं कुत्रास्ति। ये सावयवाः ते नानाशक्तिका इति सन्निवेशो भवेत्। न तु निरवयबानाम्।

एवं परमाणुनामाकारभेदं प्रतिषिध्योपसंहारायाह—

(5b) द्रव्यसति तत्रोऽस्ति स इति ।

यस्मादेवमुक्तेनाकारेण निरवयवेषु सन्निवेशभेदो न सम्भवति । तस्मात् । सोऽद्रव्यसत्स्वेव द्रष्टव्यः । शास्त्रविरचनेन सूत्रार्थनिर्देशायाह —

आकारभेदः इत्यादि ।

य आकारभेदः स संवृतिसत्स्वेवास्ति । सावयवत्वात् । न परमाणु, निरवयवत्वात् । वैशेषिकदर्शने घटादयः द्रव्यसन्त एव । तस्मात् कदाचित् ते घटादयः संवृतिसन्त इतीद कथं ज्ञायत इत्युक्तावाह—

घटादयः संवृतिसन्त एव इत्यादि ।

घटादयः संवृतिसन्त एवेति ज्ञेयम् । तथाहि—

(5c) अणूनां परिहारे हि
घटाकारकज्ञानं नोत्पद्यते ।

(5d) तदाभज्ञानविप्लवादिति ॥ 5 ॥

ज्ञानेऽस्मिन् तादृश आभासोऽस्तीति तदाभासम् । तच्छब्दः घटेन सम्बध्यते । आभशब्दः सदृशमाह । तदाभञ्च तत् ज्ञानञ्च तदाभज्ञानम् । तद्विप्लव तदाभज्ञानविप्लव । तदाभज्ञानं विप्लवते । तस्मात् । प्रत्येकपरमाणुपरिहारे घटाद्याकारकज्ञानेऽनुत्पन्नेऽपि किं तन्मात्रेण घटादयः संवृतिसत्तया स्युः । अत आह –

द्रव्यसत्सु इत्यादि ।

11 तथा ये द्रव्यसन्तः ते सम्बन्ध्यपनये स्वबुद्धिं न हापयन्ति । यथ वर्णादयः । यदि घटादयोऽपि द्रव्यसन्तो भवेयुः । तदा तेऽपि स्वसम्बन्धिपरिहारेऽपि स्वबुद्धिं न त्यजेयुः । परमणूनां परिहारे कृते द्रव्यारम्भक्रियायोग नाशात् घटनाशः । तस्माद्घटबुद्धिर्नोत्पद्यते ननु ।

सर्वस्य सर्वत्राभावान्नेति चेति चेत् अत्रोच्यते यदि परमाणुभ्य व्यतिरिक्तघटाद्यङ्गि धर्मः कश्चिदस्ति । तदा परमाणुष्वस्तीति वक्तव्यम् । किं तेषु यावत्सद्रूपेण अस्ति किं वा एकदेशेन । तत्र आरम्भकावयवव्यतिरिक्त

ये [मन्ति], तत्र तत्र [सर्वत्र] भवेदवयवी न तु एकदेशेन यद्येकदेशतो नास्ति तदा यावत्सद्रूपतोऽस्तीति भवेत्। तस्मात्परमाणवस्ते यावन्तः तावत्सु घट ह्यवयवी स्यात्। तेनावयविनि एकस्यैव विनाशे सति अवयविद्रव्यं नास्ति। एककालमनेकभावोपादानात् अनश्वादिवत्। वैधर्म्य [दृष्टान्त] स्वलक्षणम् वस्तुरूपतोऽस्ति चेत् उक्ताकारेण एककालमनेकभावोपादानत्वामन्निवेशो बाधकं प्रमाणम्।

एवं सति पक्षसाकल्येऽपि बाह्यार्थालम्बनता नोपपद्यत इति प्रसाध्य उपसंहारायाह –

तथा सतीन्द्रिय [बुद्धिना] मित्यादि।

यस्मादेवं परमाणव आलम्बनानि न युज्यन्ते। तस्मात् इन्द्रियबुद्धयो न बाह्यर्थविषयिका इति सिध्यति ॥ ५ ॥

एवमन्यसमयप्रतिषेधेन सर्वथालम्बनप्रतिषेधेन, अभ्युपगमप्रसिद्धेर्बाधा भवेदिति स्वसमय आलम्बनव्यवस्थानिर्देशायाह—

(6) यद तर्ज्ञेयरूपम् इत्यादि

सूत्रार्थः— ज्ञाने ज्ञेयाकारः शकलवत् योऽवभासते स एव ज्ञानविषय इति। अन्तरिति आध्यात्मिकः। स चात्र ज्ञानं द्रष्टव्यम्। अन्तश्शब्दोऽयं स्वभावसन्निहितार्थः। तेन ज्ञानमन्तरित्युच्यते। ज्ञेयरूपमिति विषयाकारो ग्राह्यभाग इत्यर्थः। तुशब्दोऽवधारणव्यवधानार्थौ द्रष्टव्यः।

(6b) बहिरिवावभासत इति।

बाह्यवदवभासते। आकारखण्डवदिति भावः। तदेवमवभासकारणलक्षणमपि आकाशधातुरवभासते। तदाकाशं विज्ञाने भासते। तेन विज्ञानात् शकलवत् तेन ग्राह्यभाग आदृश्यते। तद्यथा चन्द्रप्रतिबिम्बमादर्शतले भवति। आकाशं प्रतिबिम्बवशात्कूपे भवति। शकलाभासवत्।

बाह्यविषयेऽसति विज्ञानस्यालम्बनप्रत्ययता न काप्यस्ति ननु इति चेदत आह —

बाह्येऽर्थे इत्यादि।

अत्रालम्बनप्रत्ययाभावदोषो नास्ति। तथाहि यद्यपि बाह्यार्थो नास्ति। तथापि अन्तर्बाह्यवदवभासनमस्त्येव। अतः तदेवालम्बनप्रत्ययो भवति यथा तैमिरिकस्य केशमक्षिकाद्याकारबुद्धौ केशाद्याकारवद्भवति। एवं ग्राह्यभाग आलम्बनलक्षणयुक्तत्वात् आलम्बनप्रत्ययतयोच्यते।

चित्तमिदं कथमालम्बनलक्षणतया युज्यत इति चेदाह—

(6c) विज्ञानरूपत्वात् इत्यादि ।

यस्मात् ज्ञानं नीलपीतादिप्रपञ्चवासनापरिपाकवशात् नीलपीताद्याकारकमुत्पद्यते । तस्मान्नीलपीताद्याकारकमित्यतस्तदाकारकतया सिध्यति । यस्मात् नीलाद्याकारस्तस्य विज्ञानस्य प्रत्ययः तस्मात्कारणतयापि सिध्यति । तत्प्रत्यय एव तत्प्रत्ययता । तच्छब्दो विज्ञानेन सम्बध्यते । तद्रूपा तत्प्रत्ययता । तत्प्रत्ययतास्ति तस्मात् । तृतीयेय हेतौ द्रष्टव्या ।

शास्त्रकारेण सूत्रार्थव्याख्यानोपयेनोपसंहारायाह—
अन्तर्विज्ञानमर्थतयावभासते इत्यादि ।

यस्मात् विज्ञानमन्तस्सदर्थाकारेण तदाकारकम् । सोऽर्थाकारः सन् तदुत्पादकः । तस्मात् धर्मताद्वयवान् । तेन अन्तरेवालम्बनं युज्यते । एव विज्ञानं हि अन्तस्सदर्थ[क]म् । विज्ञानाकारस्तादृशः । तादृश इत्यतस्तदाकार[क]म् । तद्यथा मुद्रालेखाकारेण तदाकारकः । यस्माद्ग्राह्यभागे सति उत्पद्यते । तस्मात्तद्विज्ञानं तत उत्पद्यते इत्यत आलम्बने भागद्वयमस्तीत्ययमालम्बनतया युज्यत इत्युक्तं भवति ।। ६ ।।

अत्र परवचनस्यावकाशदर्शनायाह—
[यदि] तावदेवमवभास[एव]वेद्यत इत्यादि ।

विज्ञानेऽन्तः सन् ज्ञेयावभास एव वेद्यते । एवं स तु ज्ञेयाकारो नियताकारवदुत्पद्यत इत्युक्ते तदेकदेशो भवति । यः सहजातो ज्ञेयाकारः स कथं तद्विज्ञानस्य प्रत्ययो भवति। एवं सति आत्मनि क्रियाभ्युपगमः अतिप्रसङ्गश्च स्यात् । ग्राहकभागोऽपि ग्राह्यभागजनकः स्यात् । गोर्वामदक्षिणविषाणे मिथो जनकतया प्रसक्ते ननु किल । इति पूर्वः पक्षः । इदम् अशासनमिति परिहरति—

(7a) प्रत्ययोऽव्यभिचारित्वात् इति ।

तस्यैव विवरणायाह–

सह भूतोऽपीत्यादि ।

नायमत्र दोषो भवति । यस्मात् ग्राहयत्वात् भागः सहभूतोऽपि प्रत्ययः अन्यः समनन्तरहेतुः स्वतो जातविज्ञानस्य प्रत्ययतया भवति । तं ग्राहयभागं विना विज्ञानं नोत्पद्यते । स च (त्रि) दण्डाश्रयनयेन केवलं द्रष्टव्यः । न तु अखण्डप्रत्ययव्यापार एकैकप्रत्यय (व्यापारो) वा आरोप्यते । यदि च ज्ञानं तद्ग्राहयभागान्नाहितोपकारकम् तदा (तं विना) नोत्पद्यते । एवमनाहितमुपकारमपेक्ष्य न भवति । अनाहित उपकारः । असत्यपि च न किञ्चिदुत्पन्नं भवेत् ।

यद्यनेनाकारेण ग्राह्यावयवः कारणतया भवति । भवतु । को विरोधः । गोर्वामदक्षिणविषाणयोर्व्यभिचारान्न हेतुफलभावः । आत्मनि क्रिया क्वचिदिष्यते एव । यथा प्रदीपः । स तु आत्मनैवात्मान प्रकाशयति । वचनविशेषेण चात्मनि क्रिया सम्मता । हेतुफलभावोऽव्यभिचारहेतु लक्षणक इतीदं कुतः ।

हैतुका एवमाहुः— भावाभावयोः (तद्वत्ता) इत्यादि ।

हैतुका एवं भावाभावौ अस्तिता नास्तिता च या सा हेतुहेतुमतोः क्रमेण जायमानयोश्च लक्षणम् इति वदन्ति । यस्मिन् सति यद्भवति । (तयो) रेको [हेतुः इतरो] हेतुमान् । अत्र च ग्राह्यभागे सति ज्ञानं भवति । नासति । तस्मात्सहभूतेऽपि द्वे हेतुहेतुमत्तया सिध्यतः । हैतुका इति हेतुव्यवहारिणः तार्किका इति भावः । तद्वत्तेति भावाभाववत्ता । हेतुहेतुमदिति हेतुफल इत्यर्थः ।

एवं विषयविषयिभावं समकालं प्रदर्श्य क्रमेण विषयविषयिप्रदर्शनायाह—
अथवा, शक्तचर्पणात्क्रमेण वा इति ।

अथवा ग्राह्यभागः शक्तिमर्पयन् क्रमेण समुत्पादकरूपो विषयो भवति । एवं स ग्राहयभागो निरुद्धः सन् आलयविज्ञाने शक्तिमर्पयति । स शक्तिर्यदि द्वितीयक्षणे सहकारिणः साधयति तदा । द्वितीयक्षण एवं स्वसदृशं विज्ञानमुत्पादयति । यदि न साधयति तदा तृतीयक्षणे चतुर्थक्षण वा युज्यते । यदा साधयति । तदा परिपाकात् स्वसदृशं विज्ञानमुत्पादयति । पक्षेऽस्मिन् आत्मनि क्रियाविरोधात् एकदेशत्वात् सहजातत्वादित्यादयो दोषा न सम्भवन्ति । एवं पूर्वज्ञानस्य ग्राह्यत्वात् नीलाद्याकारवत् यदस्ति । तत् नीलाद्याकारकं ज्ञानं पश्चादुत्पादयति । तस्मादिमे दोषा नैव सम्भवन्ति ।

यदि शक्तिर्ज्ञानमुत्पादयति । तथा सति पुनः शक्तिरेव विषयो भवति ननु पूर्वो

ग्राह्यभाग इत्याशये (सति) ग्राह-

[7b] क्रमेणापि इत्यादि ।

नायं दोषः। एवं क्रमेणापि स ग्राह्यभागः स्वसमानं फलमुत्पादतीत्यत आलयविज्ञानाश्रयितया शक्तिं करोति। यदि स ग्राह्यभागः शक्तिं नार्पयति। सा शक्तिस्तयाविधं ज्ञानमपि नोत्पादयेत्। अतः शक्तित उत्पन्नं ज्ञानं तदपि ग्राह्यभागादेव समुत्पन्नमिति न कश्चिद्विरोधः। अस्मिन् पक्षे तु धर्मताद्वयव(त्ता)सुतरामुपपद्यते। एवं स ग्राह्यभागः स्वदृशं ज्ञानं पश्चादुत्पादयतीत्यतो धर्मताद्वयवान् भवति।

अत्र परस्य वचनावकाशप्रदर्शनायाह—

यदि तर्हि स्वरूपमेव इत्यादि ।

यदि भवान् स्वरूपमेवालम्बनप्रत्ययमिच्छति। तदा कथं तत् स्वरूपं चक्षुश्चोपादाय चक्षुर्विज्ञानमुत्पद्यते। तथाहि चक्षुः पूर्वमाभासगतं यत् रूपम्। तेन सह चक्षुषा स्वविज्ञाने समुत्पाद्ये स्वं रूपं चक्षुः पूर्वमाभासगतमेव न भवति। तत् कथं तेन स्वरूपेण सह चक्षुश्चक्षुर्विज्ञानमुत्पादयतीत्युच्यते। तत् कदापि पुरतो नास्ति। तत् कथमाभासगतमितिपूर्वपक्षः।

शास्त्रकारस्तत्परिहारायाह—

(7c.d) सहकारिवशात् शक्तिरूपम् इत्यादि ।

यदीन्द्रियं भौतिकम् तदात्र दोषो भवेत्। वयन्तु इन्द्रियतयेष्टा विषयसहकारिशक्तिर्या तदिन्द्रियमिच्छामः। अतोऽस्मद्दर्शने यथा रूपमन्तरस्ति। तथा चक्षुरपि अन्तर्वस्तु इत्यतो यथोक्तदोषदृष्टिः कुत्रास्ति। सहकारिवशादिति [य]दिदं विषयसहकारि [तत्]इन्द्रियमिष्यते इत्येवं द्रष्टव्यम्। एवमसति इन्द्रस्य [इदं] इन्द्रियमिति कृते [इन्द्रस्य] अवियुक्तं स्यात्। इन्द्रस्य [इदं] इन्द्रियमित्युक्तिः शोभनमेव न भवति। इन्द्रियश्च शक्तिरूपमेव इतीदं कथं ज्ञायते। अत आह—

इन्द्रियम् इत्यादि ।

यस्मात् इन्द्रियं स्वकार्यात् विज्ञानलक्षणाच्छक्तिरूपतयानुमीयते। न तु भौतिकतया। एवं कार्यात् कारणमात्रानुमाने शक्तिः न तु कारणविशेषे। विशिष्टे लिङ्गव्याप्य भावात्। यथा धूमात् वह्निमात्रानुमाने शक्तिः न तु वह्निविशेषे तृणपत्रादि (वह्नौ)। तथा कार्याद्विज्ञानलक्षणात् हेतुमात्रमनुमातुं शक्यते न तु हेतुविशेषाः

12

भौतिकत्वादयः। एवं वैभाषिकदर्शने भौतिकमिन्द्रियम्। भदन्तबुद्धदेवदर्शने भूत-

12
रूपमेव । योगाचारदर्शने विज्ञानमेव । माध्यमिकदर्शने संवृतिसत् । साङ्ख्य-दर्शने आहङ्कारिकम् इत्येवमादिविशेषानुमानं न शक्यते । तस्माच्छक्तिप्रबन्ध-मात्रानुमानात् शक्तिमात्रमनुमीयते ॥ ७ ॥

तत्रैवं भवति— शक्तिः शक्तिमदपेक्षते । शक्तिर्निराधारा न युज्यते । शक्तिमत्तु इन्द्रियम् । तच्च भौतिकमिति भौतिकमिन्द्रियं सिध्यति । इति । तस्मादाह-

(8a) सा चाविद्धा विज्ञप्तेरिति।

यद्याश्रयः कश्चिदवश्यम् । तद्विज्ञानमेवाश्रयोऽस्तु । एवं विज्ञानस्य प्रतिविषयं विज्ञप्तिरूपत्वात्स्वं विज्ञप्तिरूपत्वादुभयं प्रसिद्धम् । तस्मात्तदेव कर्मणा आरोपित आश्रयो भवतु । शक्तिस्तु विज्ञानेनाविरुद्धा येन तद्विज्ञानाश्रयता न युक्ता भवेत् ।

तदेवं भौतिके व्यवस्थिता शक्तिरपि कार्यमन्यदुत्पादयति विज्ञाने स्थिताऽपि अन्यदुत्पादयति । तथा सतीन्द्रियमवश्यं भौतिकं ज्ञेयमिति चिन्तयतस्तदाशय-प्रत्युद्गमनायाह —

शक्तिस्तु विज्ञाने वास्तु इत्यादि ।

एवमाश्रयकृतभेदो नास्ति। तथाहि शक्तिर्यदि [वा] विज्ञाने स्थिता च भवतु । अथान्यत्र स्थिता च भवतु । सर्वथा तया रूपदर्शनादिमात्रं क्रियत इत्यतः फलोत्पत्तिक्रियायां न विशेषोऽस्ति ।

अनिर्देश्ये स्वरूप इति तु

12a
मतान्तर इन्द्रियस्वरूपम् । इन्द्रियमनवभासान्न परीक्षितुं शक्यते । अपरीक्षितञ्च न निर्देष्टुं शक्यते । तस्मादन्यमतेनेन्द्रियमनिर्देश्यस्वरूपम् ।

अथेन्द्रियशक्तिः— तत्कारणं किम् । उपसंहारव्याजेन तत्प्रदर्शनायाह—

(8b) एवं विषयरूपकम् इत्यादि ।

यथा विज्ञानमिदं इन्द्रियशक्तित उत्पद्यते तथा इन्द्रियशक्तिरपि इन्द्रियाक्षेपकात्पूर्ववि-ज्ञानादुत्पद्यते । तच्च पूर्वविज्ञानं [ततो]ऽपि पूर्वतरेन्द्रियशक्तेरुत्पद्यते। तथा च इन्द्रियशक्तिविषयाकारकविज्ञानञ्चेदमुभयमन्योन्यहेतुकं प्रवर्तते । हेतुफलप्रबन्धस्यास्य कालादिर्नास्तीति इदमुभयमनादिकालं द्रष्टव्यम् ।

शास्त्रकारः सूत्रार्थं प्रदर्शनायाह—

चक्षुराख्यामित्यादि ।

चक्षुराख्येन्द्रियशक्तिर्या निर्दिष्टा, तां अन्तःरूपञ्च सह वा पूर्वभूतं वा प्रतीत्य अनवसितार्थाकारकं विज्ञानमुत्पद्यते । यथा बाह्यार्थवादिदर्शने अवसितादर्थादेव विज्ञान-मुत्पद्यते । न तथा भवतीत्यत इदमुक्तम्—

विज्ञानमर्थावभासमालम्बनादविविक्तमुत्पद्यत इति

अन्ये तु वदन्ति—अनिर्दिष्टार्थविभासमिति । स चार्थोऽत्यन्तविविक्तो नावभासते ।

13

अनिर्दिष्टमेवात्र न किञ्चिदवश्यं विविच्यते । यतः स्वलक्षणं सर्वमनिर्देश्यम् । यदि तदवभासं ज्ञानमुत्पद्यते तेन किञ्चिद्वस्तु सिद्धं भवति । अथार्थाकारकं ज्ञानमुत्पन्नं यदस्ति । तन्निर्देष्टुं न शक्यत इति । तत्र च कस्याभावान्निर्देष्टुं न शक्यते । अथ स्वलक्षणत्वात् । यदि [कस्यचित्]अभावादिति तन्न युज्यते । यतोऽसन् शशविषाणादिरपि निर्दिश्येत । अथ स्वलक्षणत्वादिति चेत् अत्रोत्तरं दत्तमेव ।

चक्षुराख्यां शक्तिं प्रतीत्येत्यत्र आदि[पद]मध्याहार्यम् । तेन चक्षुराद्याख्येत्युक्तं भवति । अथ सा शक्तिः कस्मादुत्पद्यते । इति चेदाह –

इदं द्वयमन्योन्यहेतुकम् इति ।

सा च शक्तिरिन्द्रियाक्षेपकात् पूर्वविज्ञानादुत्पद्यते । तच्च विज्ञानं [ततो]ऽपि पूर्वतरशक्तेरुत्पद्यते । सा च शक्तिरिन्द्रियाक्षेपकपूर्वविज्ञानादुत्पद्यत इति हेतुफल-भावपरम्परेयमनादिकालिका । एवं तावदिन्द्रियशक्तिर्विज्ञानञ्च हेतुफलभावतो निर्दिष्टम् । द्वयमिदमन्योन्यहेतुकमनादिकालमित्युक्त्यैव विषयशक्तिर्विज्ञानञ्चान्योन्यहेतुकानादिकालतया च निर्दिष्टम । अन्योन्यहेतुकतानिर्देशादाह—

कदाचिच्छक्तिपरिपाकात् इत्यादि ।

कदाचित्प्रपञ्चवासनाख्यशक्तिपरिपाकाद्विज्ञानं विषयाकारतया भवति । कदाचि-द्विषयाकारकचित्ताच्छक्तिरुत्पद्यते । अत्र च हेतुफलपरम्परायामस्यां तत्सन्तत्यविच्छेदेना-नादिकालिकता ज्ञेया ।

किञ्च किमिन्द्रियं विषयशक्तिश्च विज्ञानादन्या उत न । यद्यन्या । तदा नाममात्रे विप्रतिपत्तिः । अर्थस्तु समानः । विज्ञानव्यतिरिक्तेन्द्रियालम्बनयोरभ्युपगमात् । अथानन्या । तदा शक्तिरियमिन्द्रियरूपा विषयो [ऽयम्] इति व्यवस्थात्र व्यवस्थात्र न भवेत् । इति चेदत आह—

विज्ञानञ्च सा चोभयमित्यादि ।

यदि वस्तुनीति दृश्यते । तदा शक्तिरवस्थाबिशेषात्मतया संवृतिसत्त्वात् विज्ञानादन्या वा अनन्या वेति नाभिधेया । अथ लोकव्यवह्वार आश्रीयते । तदा यथेष्टं कदाचित्तस्माद्विज्ञानादन्यैवोच्येत । कदाचिदनन्येति । यतः संवृतिसत्सु लोके कदाचित् पृथग्व्यवहार आरोप्यते । तद्यथा चन्दनगन्ध इत्यादि । कदाचिदपृथक्तया । यथा रूपादि इति ।

तथा पक्षद्वयेऽपि आलम्बनमन्तर्निर्दिष्टमित्युपसंहारायाह— एवमन्तरिति । तथा सत्युक्ताकारेण विज्ञानादनन्य आलम्बने धर्मताद्वयविशिष्टत्वात् विषयतोपपद्यते ।। ८ ।।

आलम्बनपरीक्षायाः संप्रकाशितवृत्तितः ।

पुण्यं यल्लभ्यते तेन बुद्धत्वं जगदाप्नुयात् ।।

14

टीकाऽदिकर्मिकमुदे व्यपेतदशधातुका ।

विनीतदेवेन कृता, प्रवदध्वं ततो बुधा ।।

15

ह्रातुकाम इमां दोषग्रहं न दययेक्षताम् ।

स्वविकल्पवशाब्द्वुद्धावदुष्टाऽपि च भासते ।।

आलम्बनपरीक्षाटीका आचार्यविनीतदेवेन

ज्ञानालम्बनकात्स्न्यावतरणवादिसिंहेन

तीर्थिकमहागजप्रमथनेन

कृता समाप्ता ।।

भारतपण्डितशाक्यसिंहेन संशोधकलोत्सव-

श्रीकूटेन च परिवर्त्य

पृष्टाव् विनिश्चिता

## Foot Notes
## To Vinitadeva's Tikā

1. Vinitadeva counts *manas* as the 6 th sense-organ whereas Dharmapāla denies it in accordance with Dignāga's view: न सुखादिप्रमेयं मनो वास्तीन्द्रियम् ।(Pram. Sam. I,) cited in the Nyayav. Tātparyatikā, p. 97 cp. Abh. kośavyākhyā I. p 40 l. 24. The Vaibhasika describes it: षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः। Kośa, I, 17. Santaraksita repeats the Same:

   चक्षुराद्यतिरिक्तं तु मनोऽस्माभिरपीष्यते ।
   षण्णामनन्तरोद्भूतप्रत्ययो यो हि तन्मनः ॥

   Tattvas. p. 209. v b31. Ref. Th stcherbatsky's Bud. Log. II, P.318,n-9 for detailed information on this point.
2. See his Tīkā, Introductory part.
3. This prayoga is not found in the tīkā prin·ed here; so it appears that the Chinese translation is defective.
4. See p. above for explanation of this term.
5. To be amended.
6. The said prayoga is also not in his Tīkā.
7. Not mentioned by Dharmapāla.
8. Substantially existing. It is nominal for Buddhists.
9. A well-known master who denies distinction between *bhūta* and *bhautika* so the ten bases āyatana are mere *bhūta*, primary matters, the Satyasiddhi would also support this view, cfr. chs. 36ff.
10. Because subtle and gross are mutualy contradictory.
11. They are ultimate elements for the Sautrantika cfr. Satyasiddhi; ch.36—39.

11a Cp. Kośabhasya p. 85, त्रिदण्डान्योन्यबलावस्थानवत्

12 The Same Buddhadeva as stated above, *v.* note 9. Here the yogācāra system is probably the Agamanusāri yogācāra of pre. Dignāga-period.

12a. This opinion is perhaps of the Sautrāntika, read yasomitra's remark ad Kośavyā. I, 9 and my Eng. translation of the Kośa, I in IHQ. Sept. 1953, p. 242 and Sarvāstivāda in JORM. Vol. IX, 1, p. 23.

13. *Anirdeśya* in the sense of *anabhilāpya* as in the Vimsika of Vasubandhu, ad ver. 10 and 21, and Dharmakirti's Nyāyabindu I, 5. cp. also the Pra. Samuccaya I, 5; स्वसंवेद्यमनिर्देश्यं रूपमिन्द्रियगोचरः ।

14. *Khams. bcu. dañ. ni bral. bar byas.*

15. This verse may be continued thus :—
दोषं गृहीत्वा हातुकाम इमां दयया नेक्षताम् ।
स्वविकल्पवशात् | [मन] बुद्धौ अदुष्टाऽपि च भासते ।।